# RAMAKRISHNA MISSION VIDYAMANDIRA
**(Residential Autonomous College under University of Calcutta)**

**M.A./M.Sc. FOURTH SEMESTER EXAMINATION, MAY 2015**

**SECOND YEAR**

Date : 13/5/2015 **SANSKRIT (*Kāvya*)**

Time : 11 am – 3 pm Paper : X Full Marks : 100

1. **<u>एकस्य</u>** प्रश्नस्य उत्तरं प्रदेयम्। [1×10]
   क) नाट्यवेदस्य वेदत्वं कथमस्ति? ब्रह्मणा नाट्यस्य उपादानानि कथंकारं संगृह्य नाट्यं सृष्टम् इति सयुक्ति यथाग्रन्थं व्याख्यायताम्। [2+8]
   ख) 'अत:परं प्रवक्ष्यामि चतुरस्रस्य लक्षणम्' इत्युक्त्वा भरतेन यदुक्तं तस्य विवरणं वैशद्येन विव्रियताम्।

2. अधोलिखितेषु प्रश्नेषु <u>पञ्च</u> प्रश्नाः समाधेयाः। [5×2]
   क) नाट्यशास्त्रे कति अध्यायाः सन्ति? नाट्यशास्त्रस्य प्रसिद्धटीकायाः नाम लेख्यम्।
   ख) के मुनयः कीदृशं भरतं पञ्चप्रश्नान् कृतवन्तः?
   ग) यजुर्वेदात् कीदृशं नाट्याङ्गं कथमाहृतम्?
   घ) कौशिकीवृत्तिप्रयोगे सामर्थ्ययुक्तानां जातिमुल्लिख्य तत्र यथेच्छं नामद्वयं लेख्यम्।
   ङ) मर्त्यानां कृते निर्दिष्टस्य मण्डपस्य प्रमाणं कीदृशम्?
   च) मत्तवारणी कुत्र कर्तव्या?
   छ) नेपथ्यगृहस्य द्वारसंख्या मृत्तिकावर्णश्च उल्लिख्यताम्।

3. **<u>एकस्य</u>** प्रश्नस्य उत्तरं प्रदेयम्। [1×10]
   क) श्लोकान् श्लोकांशान् वा समुद्धृत्य मेघदूतमाधारीकृत्य अलकायाः सौन्दर्यं समुपवर्ण्यताम्।
   ख) अभिशप्तयक्षः कुत्र निर्वासितः? तस्मात् स्थानात् अलकां यावत् मेघस्य गमनमार्गो विशद्यताम्।

4. अधोलिखितेषु प्रश्नेषु <u>पञ्च</u> प्रश्नाः समाधेयाः। [5×2]
   क) खण्डकाव्यस्य किं लक्षणम्? गीतिकाव्येन सह अस्य सादृश्यं विचारय।
   ख) दूतकाव्यस्य उत्सरूपेण वैदिकसाहित्ये का कथा समुपलभ्यते? कस्मिन् वेदे प्राप्यते उपाख्यानमिदम्?
   ग) मेघदूतस्य टीकाद्वयस्य नाम लिख्यताम्। कौ टीकाद्वयरचयितारौ?
   घ) मेघदूतस्य प्रारम्भिके श्लोके कः कर्ता, का च क्रिया?
   ङ) 'स्वाधिकारप्रमत्तः' कस्य विशेषणमिदम्? कस्मिन् कर्मणि तेन भ्रष्टता कृता?
   च) 'जातं वंशे भुवनविदिते' कस्मिन् वंशे मेघस्य उद्भवः? अनेन किं बोध्यते?
   छ) 'वित्तेशानां न च खलु वयो यौवनादन्यदस्ति' 'वित्तेश' — शब्देनात्र के बोध्यन्ते? यौवनादन्यद् वयस्तेषां कथं नास्ति?

5. **<u>एकस्य</u>** प्रश्नस्य उत्तरं प्रदेयम्। [1×10]
   क) 'कारुण्यं भवभूतिरेव तनुते' — व्याख्यायताम्।
   ख) उत्तररामचरितस्य प्रथमाङ्कः किंनाम्ना चिह्नितम्? अङ्कस्यास्य नाटकीयतात्पर्यमालोच्यताम्।

6. अधोलिखितेषु प्रश्नेषु <u>पञ्च</u> प्रश्नाः समाधेयाः। [5×2]
   क) उत्तररामचरितस्य तृतीयाङ्कः किंनाम्ना व्यपदिश्यते? किं वा तस्य नामकरणस्य तात्पर्यम्?
   ख) का आसीद् वासन्ती? सीतया सह को वा तस्याः सम्पर्कः?
   ग) किं वा गर्भाङ्कस्य लक्षणम्? उत्तररामचरितस्य कस्मिन् अङ्के गर्भाङ्कः सन्निवेशितः?
   घ) का आसीत् आत्रेयी? किं वा तस्या दण्डकारण्ये आगमनकारणम्?
   ङ) 'पञ्चप्रसूतेरपि तस्य राज्ञः' अत्र 'राज्ञः' — शब्देन को बोध्यते? कानि तस्य अपत्यानां नामानि?
   च) 'ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति' — किं वा अस्य वाक्यस्य तात्पर्यम्?
   छ) क आसीत् ऋष्यशृङ्गस्य पिता? ऋष्यशृङ्गेण सह कस्याः परिणयोऽभवत्?

7. **<u>एकस्य</u>** प्रश्नस्य उत्तरं प्रदेयम्। [1×10]

क) मृच्छकटिकप्रकरणे तत्कालीनसमाजस्य यत् चित्रं चित्रितं तदालोच्यताम्।

ख) 'मृच्छकटिकम्' इति प्रकरणस्य नायकः कः ? अलंकारशास्त्रानुसारं सः कस्यां श्रेण्याम् अन्तर्भुक्तः ? तस्य चरित्रचित्रणं कुरु।

8. अधोलिखितेषु प्रश्नेषु **<u>पञ्च</u>** प्रश्नाः समाधेयाः। [5×2]

क) मृच्छकटिकस्य रचयिता कः ? मृच्छकटिकं कीदृशी रचना अस्ति ?

ख) मृच्छकटिकनामधेये प्रकरणे कति अङ्काः सन्ति ? प्रथमाङ्कस्य नाम लेख्यम्।

ग) मृच्छकटिके मुख्यरसः कः ? मृच्छकटिके नायकः कः ?

घ) कस्य सर्वं शून्यम् ? कथञ्च ?

ङ) रदनिका का अस्ति ? का वा मदनिका ?

च) कः आसीत् शर्विलकः ? स कथं चौरकर्म प्रशंसति ?

छ) मृच्छकटिकस्य भरतवाक्यं लिखत।

9. **<u>एकस्य</u>** प्रश्नस्य उत्तरं प्रदेयम्। [1×10]

क) राक्षसेन प्रयुक्ता नीतयः चाणक्येन कथं व्यर्थतां प्रापिता इति पर्यालोच्यताम्।

ख) मुद्राराक्षसनाटकस्य तृतीयाङ्कः किंनाम्ना अभिहितः ? अङ्कस्यास्य नाटकीयतात्पर्यस्य पर्यालोचनं कुरु।

10. अधोलिखितेषु प्रश्नेषु **<u>पञ्च</u>** प्रश्नाः समाधेयाः। [5×2]

क) मुद्राराक्षसस्य उत्सरूपेण किं परिगण्यते ? तत्र कस्य चरित्रस्य अभावो दृश्यते ?

ख) मुद्राराक्षसे कति अङ्का विद्यन्ते ? मङ्गलाचरणेऽस्य कस्य स्तुतिः प्राप्यते ?

ग) कः आसीत् वैरोचकः ? कथं स निहतः ?

घ) कः तावत् कौमुदीमहोत्सवः ? केन महोत्सवस्य पालने निषेधः कृतः ?

ङ) राक्षसस्य परिवारः कस्य गृहे न्यासरूपेण संरक्षितः ? राक्षस्यस्य मुद्रा कुतः प्राप्यते ?

च) किंनामा अहितुण्डिकः राक्षसचरः ? किंनामा मलयकेतोः कञ्चुकी ?

छ) शकटदासः कः ? वृषलः क आसीत् ?

—— × ——